तमसद्भावोर्याणामनालोचितं चेष्टितं ॥ अनस्तेषु विवर्द्धन्ते निर्विघ्नाविभूतयः अत्रानालोचितचे
ष्टितस्यात्यंताभावो विभूतीनां निर्विघ्नवृद्धिहेतुः । एतेनाभावाभावोपि व्याख्यातः अत्रप्राःगभावा
वो यथा । उद्यानसहकाराणामनुद्भिन्नानमंजरी । ददयः पथिकनारीणां सतिलः सलिलांजलिः । अ
त्रवस्तुनत्पत्नादेः प्रागभाव उच्यते ॥ तेनेहसहकारमंजरीणामुद्भेदस्य पथिकनारीणांमरणोका
रणत्वं । प्रध्वंसाभावाभावो यथा । पीनश्रोणिगंभीरनाभिनिम्नतमध्ये भृशंध्वस्तनोपापादः परिरब्धु
मविद्वद्धितुः कांतेनकांतवपुः । स्वावासानुपघातनिर्वृतमनास्तत्कालमीलद्भ्रयस्येसत्सुतनाभि
पद्मवसतिर्वेधाः शिवं व्यापनि । अत्रपयोजेनवपुषायोयमालिंगनेपि विधिनिवासनाभिपंकेजा
नुपघातः सदहवस्तुनोवस्थानमेवप्रध्वंसाभावाभावदुच्यते । सचेहाच्युतनाभिपंकजनिवासि
नोविधेर्मनोनिर्विकारणोभवति । विद्रकार्यः सहजः कार्यानिनराजस्तथा युक्तानपुन्यूस्येवमसं
ख्यापित्रहेतवः तेमोप्रयोगमार्गेषु गोरणत्वमित्यपाश्रयः कार्याकार्येषु वैविध्य यथा तेकतेमीशते । तेषु
विद्रकार्यो यथा ॥ अनपूर्वामिनसुगोयमानेमल [illegible] । अस्मद्य स्वहस्तसहस्रा पि
वासीद्वृत्तावतीनस्यभुजेनभूपिः । सोपेवा [illegible] । विद्रकार्यो नाम विवहेतु

।सहजो यथा।सममेव समाक्रांतं द्वयं द्विरदगामिना। तेन सिंहासनं पित्र्यमखिलं चारिमंडलं। अत्र राज्याभि
षेकारिमंडलाक्रमणयोर्हेतुहेतुमद्भावेन सत्यपि यौगपद्यप्रकारित्वात्तुल्यमेव कार्यकारणभावो
विवक्षितः॥ तेन सहजो नामायं चित्रहेतुः। कार्यानंतरजो यथा। पश्चात्पर्यस्य किरणानुदीर्णं चंद्रमंडलं प्रा
मेव हरिणाक्षीणामुदीर्णो रागसागरः। अत्र चंद्रोदयलक्षणाद्धेतोः॥ पूर्वकालमेव सागर उदीर्ण इति कार्य
स्योदयलाभः। सहगुणानुत्पाश्रयणेन हेतावतिशयं पुष्यतीत्ययं कार्यानंतरजो नामचित्रहेतुः॥ युक्तो य
था। गुणानुरागमिश्रेण यशसा तव सर्पता। दिग्वधूनां मुखे जातमकस्मादर्द्धकुंकुमं॥ अत्र दिग्वधूमुखेषु
ते गुणानुरागः कुंकुमं यशश्च चंदनमित्ययं युक्तो नाम गौणवृत्तिव्यपाश्रयश्चित्रहेतुः। नयुक्तो यथा नमीलय
ति पद्मानि नभोप्यवगाहते। त्वन्मुखेंदुर्मदाक्षीणां हरणायैव यस्यति। अत्र मुखेंदोः पद्मनिमीलनादि न युज्यत इति
नयुक्तो नामचित्रहेतुः। एवं शब्दस्य प्रकारवावित्वात्। व्यधिकरणाद्यः प्रयुज्यते यथा। सा वल्लभावयमप्रगल्भव
चसः सा स्त्री वयं कातराः। सा पीनोन्नतिमत्पयोधरयुगं धत्ते सखेदा वयं। सश्लोता जघनस्थलेन गुरुणा गंतुं न
शक्ता वयं दोषैरन्यजनाश्रयैरपटवो जाताः स्म इत्यद्भुतं॥ अत्र भिन्नत्वमेव व्यधिकरणत्वं कार्यकारणयोः प्रतीय
त इत्ययं व्यधिकरणो नामचित्रहेतुः। उतरस्य नोवास्वभावेन शक्तेर्वी हानिर्हेतुना॥ अरुणात्मीयकार्यः स्याद्धेतु
र्व्याहतस्त्वयः। तत्राकृते कार्याविरुद्धस्य भावेन यथा। न विरचिता ललाटतटलास्यकरी भ्रुकुटिर्न पद्मवर्द्धं कृतेन मधुर
स्मितमंतरितं न नवनिष्ठुभसेष्यमवशादपिदारुणया भगवति विद्ययाकलुषितेव दृशा वृत्ते॥ अत्र निष्ठुभसेष्यमस्य

१९

19A

हेतोरनुत्पादितभ्रकुटीदारुणाचेष्टाहारेर। भगवतोमुरारेर्वक्त्रस्यानुष्मस्य करणोपरसामर्थ्ये तत्र तन्मुख
स्यस्वरूपः स्वभावोनिमित्तमितिस्वभावादनुत्पादितकार्योयमहेतुः। स एव शङ्के हानिहेतुना यथा। अनु
रागवतीसंध्यादिवसस्तत्पुरःसरः। अहो दैवगतिश्चित्रा तथापि न समागमः। अत्रानुरागवत्त्वतत्पुरःसरत्वयोः
समागमहेत्वोःसामर्थ्ये विद्यमाने दैवगतिकारणमिति शङ्के हानिहेतुनायमकृतस्य कार्यो नामाहेतुः। वस्तुनः स्व
भावेन व्याहतो यथा। नीवीवंधोच्छ्वसनशिथिलेपत्रपत्तीनम्नानां क्षौमं रागादनिभृतकरेष्वाक्षिपत्सु प्रियेषु। अ
र्चिस्तुंगानभिमुखगतान प्राप्य रत्नप्रदीपान्ह्रीमूढानां भवति विफलप्रेरणा चूर्णमुष्टिः। अत्र रत्नप्रदीपनिर्वा
पणे चूर्णमुष्टेरपेरितस्यापि विघाते रत्नप्रदीपाख्यवस्तुस्वभावः कारणमित्ययं वस्तुभावेन व्याहतो नामाहेतु
भूतः। ११। एव शङ्के हानिहेतुना यथा। शम्भोः कूतनत्यकमेलाकरे केकालमाघं हरेः सैषद्दस्फुरितेदुमंडलत्योपूष
सेजोविनं। ... कालपराणेतमुरद्विषिनवेदष्टाविलासंश्रियः कुर्वन्कोपकषायितेन मनसा मिथ्यन्तानीयानुकः। अ
त्र कोपकषायितमनसस्तस्योन्नतिकारणसमर्थस्याप्यधरग्रहणामिथ्यायदभिधीयमानः प्रतीतोव्याघातः
ततोयं शङ्के हानिहेतुना व्याहतो नामाहेतुभेदः। यत्तु कारणमालेति हेतुसंतानउच्यते। प्रपक्षापासामर्थ्यात्सो
प्यहेतोनविद्यते। एकोभिधीयमानेषु हेतुत्वेषु भवेतयोः प्रतीयमानेष्व परः कारणत्वेतु नापतेः। तयोराद्यो यथा॥
जितेंद्रियत्वं विनयस्य कारणं गुणप्रकर्षो विनयादवाप्यते। गुणाधिके पुंसि जनोनुरज्यते जनानुरागप्रभवा हि संपदः
॥ अत्र जितेंद्रियत्वादीनामुत्तरोत्तरप्रति हेतुभूतानामपि संपदुत्पत्तौ पूर्वपूर्वसव्यपेक्षायां समुदितानामेव कारण

त्वं साधनादिपदैरभिधीयत इति यो ... मभिधीयमानस्तेनु त्वेरणमात्रेण हेतुभेदः । द्वितीयो यथा । पीतामृतरा
हुगोत्कं स्तभुजाग्रजातिः परिणाहि स्त्रीभिर्द्रुस्तावि सवलि अवं के रुकुवेणानो ... नोल्लीनं । अत्र जीवित
दुःखानि । क्रमेणाकरपूरस्य चलनं च स्यानिधुरग्रहणां निधुरस्य हरणस्यापि पीनत्वं दुर्वास्त्वे हेतुरिति प्रतीयमानका
रणत्वं कारणमात्रेणायं हेतुभेदः । इंगितकालरक्ष्योऽर्थः सूक्ष्मः सुगुणात्तुसः । सूक्ष्मीभूतपक्षवतः सूक्ष्मोऽमन्यपक्ष इति
भिद्यते वाच्यः प्रतीयमानश्च सूक्ष्मोऽत्र द्विविधो मतः । इंगिताकारलक्ष्यत्वं लक्ष्मयामास्य मेरयोः । तत्रेङ्गितलक्ष्य
मभिधीयमानं सूक्ष्मं यथा । तामन्यभिव्यक्तमनोरथानां महीपतीनां प्रणयात्तग्रहस्तः प्रनालशोनार्ख्यपारूप
नां शृंगारचेष्टाविविधा बभूवुः । अत्र स्वयंवरमिलितानां राज्ञां राजपुत्रीप्रतिपाभिलक्षणस्य मनोरथस्याभिधीय
मानास्य शृंगारचेष्टात्मकेमेंगितेन व्यापकत्वादयमिंगितलक्ष्योऽभिधीयमानः सूक्ष्मभेदः ॥ तदेवाकारलक्ष्यं यथा
स्याद्वृनितस्मिन्नभिलाषबंधं शशांकशालीनतयानवक्त्रं । रोमांचलक्षेण सगात्रयष्टिं भित्त्वा निराक्रामदरालकेशः
अत्राभिलाषबंधो रोमांचलक्षेण गात्रयष्टिं भित्त्वा निराक्रामादित्यनेनाभिधीयमान आकारलक्ष्यः सूक्ष्मभेदोऽभि
हितः । तदेवोभयलक्ष्यं यथा त्वदर्पितदृशस्तस्या गीतगोष्ठ्यामवर्द्धत । उद्दामरागपिशुना छाया कापि मुखांबु
जे । अत्र त्वदर्पितदृशा इंगितेन छाया कापि मुखांबुजइत्याकारेः ताभ्यामुद्दामरागपिशुनेत्यनेनाभिधीयमानस्या २०
ननरागस्य सूक्ष्मरूपतया लक्ष्यमाणत्वादयमभिधीयमान उभयलक्ष्यः सूक्ष्मभेदः । प्रतीयमानमिंगितलक्ष्यं यथा
। वाहित्ता पडिवअणं ण देइ रूसेइ एक्कमेक्कम्मि । अज्जा कज्जेण विणा य रूप्पमाणेण इक्कको । अत्र प्रतिवचना

९०A

स्य परिजनप्रकोपाभावांप्रदीप्यमानेन शोकस्य इति हेतुना प्रतीयमानः संकेतकुडुंगदाहोभ्रष्टवधूम
नस्तापो वाच्यार्थेन लक्षित इत्ययमिंगितलक्ष्यः प्रतीयमानः सूक्ष्मभेदः। प्रतीयमानमेवाकारलक्ष्यं य
था। सोमा इसाम ल्लीए अधछिपलो अरी अमुहसोहा॥ जंबूदलक अक्कस्स। व अंसभमिरेहलि अयु
तेः अत्राहिक्षिप्रलोकेन मुखश्यामतास्याकाराभ्यां जंबूदलकल्पितावतंस इत्यनेन प्रतीयमानः संकेत
गमनभ्रंशसंभवः श्यामायमानस्तापो लक्ष्यते इत्ययमाकारलक्ष्यः प्रतीयमानः सूक्ष्मभेदः। तदेवोभयल
क्ष्यं यथा। प्रपच्छतोच्चैः कुसुमानि मानी विपक्षगोत्रे दयितेन लंभिता नाकिंचिदूचे चरणेन केवलं लिलेख सा
ष्पाकुललोचना भुवं। अत्र चरणेन भूमिलिखनमिंगितं दर्शनस्याकुलत्वमाकारस्ताभ्यां गोत्रस्खलनोद्भवो मानि
न्यामनस्तापः प्रतीयमानो लक्ष्यत इत्ययं प्रतीयमानमिंगिताकारलक्ष्यः सूक्ष्मभेदः। पदार्थानां तु यः सारस्तदुत्तर
मिहोच्यते स धर्मधर्मिरूपाभ्यां व्यतिरेकाच्चाभिधते। तेषु धर्मसारूपं यथा। दानं वित्ताद्दतं वाचः कीर्तिधर्मौ तथायुषः
।परोपकरणं कायाद सारात्सारमुद्धरेत्॥ अत्र दानसत्यकीर्त्यादीनां वित्तादिवस्तु धर्मत्वे। सारभूतानामुद्धाराद्धर्म
रूपः सारः। धर्मिरूपो यथा। मधुविकचसितोत्पलावतंसं शशिकरपल्लवितं च हर्म्यपृष्ठं। मदनजनितविभ्रमा
च कांता सुखमिदमर्थवतां विभूतयोन्याः॥ अत्र मधुप्रभृतीनां विभूतिभ्यः सारभूतानां उद्धरणाद्धर्मिरूपसारः। अ
थ व्यतिरेकेण धर्मरूपो यथा। पोरंभहिनागरा जं जं अनुकिव ओतर एसु हावेह। जं जं आसि फिवअ गावबहूरां तेनंधि
ई देह॥ अत्र प्रौढस्त्रीणां सुशिक्षितेसु नकर्मअयो रुयोरं पुनराक्षिप्तं सुखयतीति कर्मनिरलसर्णाभ्यो धर्मे

भ्यः सुशिक्षिताशिक्षितारतकर्मलक्षणाः धर्मधर्म्यव्यतिरेकेणाप्रतिपत्तेरिति धर्मव्यतिरेकरूपोऽयं सारः।
व्यतिरेकेणाधर्मिरूपो यथा। राज्ये सारं वसुधा वसुधायां पत्तनं पुरे सौधं॥ सौधे तल्पं तल्पे वरांगनानंगसर्वस्वं
।अत्र वसुधादयो धर्मिण उत्तरोत्तरं सक्रमेण पूर्वतः पूर्वतो व्यतिरिच्यन्ते तद्रूपं धर्मिव्यतिरेकः सारः। एतेन धर्मध
र्मिस्वरूपोऽपि व्याख्यातः। स द्विधा सामान्यतो विशेषतश्च। तत्र सामान्यो यथा। गीतश्रीताम्बूलकर्पूरवनिता
दिभिः असारोऽयं संसारः सारवानिव लक्ष्यते। अत्र गीतादीनां जगतः सारभूता नाम विशेषेणैव सर्वेषामुपादा
नाद्वितुनतीयां ततयाच संसारस्य सारत्वेकं गभावादयं सामान्यतो धर्मधर्मिरूपः सारः। विशेषतो यथा। अवे
मिपूतमात्मा हृदयेनैव द्विजोत्तमाः। मूर्द्ध्नि गंगाम्भसा तेन धौतपापा भवाम्यहं। अगंगा प्रयाग सप्तर्षि यादो दुके
पोर्विशेषणासारभूतयोरुपादानाद्भिमवत॥ पूतत्वे चांगभूतत्वादयं विशेषतो धर्मधर्मिरूपः सारः। विरोधस्तु
पदार्थानां परस्परमसंगतिः॥ असंगतिः प्रत्यनीकमधिकं विषमं समः। तेषु विरोधः शुद्धो ग्रथितश्चानयोराद्यो
यथा। क्व युवतिमार्दवं क्व च महाहवदारुणता क्व च लवलीकरः क्व करिदन्तजमु। वरासि। क्व च नवयौवनं क्व कु
सुमायुधनिस्पृहता तव ललनाद्विवेष्टितविरुद्धमहो ललितं। अत्र युवतिमार्दवादीनां महाहवदारुणता

२१

दीनां च सुधानामेव परस्परं संगतत्वेनादयं शुद्धविरोधः। द्वितीयो यथा। दिग्वासा यदि तत्किमस्य धनुषा सा
स्त्रस्य किं भस्मना भस्माथास्य किमंगना यदि च सा कामं परिद्वेष्टि किं। इत्यन्योन्यविरुद्धचेष्टितमिदं पश्यन्निजस्वा
मिनो भृंगीसान्द्रशिरावनद्धपरुषधरं त्वेस्थिशेषे वपुः अत्र दिग्वासस्त्वादीनामुत्तरोत्तरग्रथनादन्योन्यासंग

२१A

तात्पर्यं ग्रथितनामा विरोधभेदः असंगतिर्यथा। सा उ प्यासी गोरडी उरि गोकि बक विखिसगोरि। भिडि पञ्चे
ल्लि उ सो मर इ जस्स सालगा इकंठि। अत्रार्यं विंग्रपियैसीकं ठेन गलति सम्प्रिय पहुलेत पो। परस्परमसंग
तेरयमसंगतिनाम विरोधभेदः प्रत्यनीकं यथा उत्के दासं तायोररतागरसाके॥ जागरस्तनोस्तु तना॥ फल
मिदमहो मया प्तं सुखापमृगलोचनादृष्टा। अत्र मृग[illegible]लोचनादर्शनस्याविकलनिवृत्तिःफलं। मयानुते। दृष्टा
अनस्तापादिकं प्राप्तमिति॥ प्रत्यनीकफलत्वादयं प्रत्यनीकाख्यो विरोधः॥ अधिको यथा॥ एके। दाशर
थिः कामं पातु धानाः सहस्रसः ते तु यावंत एवाजौ तावद्भ्यावदृशे स तैः। अत्रैकस्य दाशरथेरनेकसंख्ये र्या
तु धानैर्यत्समरकर्म तत्र नैरस्यता वद्याहृश्यमाना तेनैनेकसंख्याविरुद्धमाधिक्याम्पत इत्ययमधिका
ख्यो विरोधः विषमं यथा॥ दिशामालीकालकभंगनागतस्वपीवधूकर्तनिमालपल्लवः। चकार यस्याध्वधूम
संचयो मलीमसः शुक्लतरं निजे यशः अत्र मलीमसाध्वरधूमसंचयेन यदा शुक्लातिशुक्लीकरणं तद्यथा दृष्टा
द्रेव जायते तत्रादृगेव भवतीति प्रसिद्धैर्वैषम्यात्परस्परमसंगतेः रयविषमाख्यो विरोधः। प्रभूतकरणालोकान्या
देवमिति संभवः संविधौ वा निषेधे वा द्वयेन वाद्वये पि वा॥ एषु विधिविषयो यथा॥ त्वय्यादातुं जलमवनते
शार्ङ्गिणो वर्णचौरे तस्याः सिंधोः पृथुमपि तनुं दूरभावात्प्रवाहं। प्रेक्षिष्यन्ते गगनगतयो नूनमावर्ज्य दृष्टी
रेकं मुक्तागुणमिव भुवः स्थूलमध्येन्द्रनीलं। अत्र [illegible] सरितं प्रवाहो मध्या (

निविष्टेन्द्रनीलमणिमुक्तागुणाद्व गगनगनिषिद्धतारा यामविश्यन्ती निविधः संभाव्यमानत्व रयं विधिविष
यः संभवः। निषेधविषयो यथा। परस्य भूयान्विवरोभियोगः प्रसह्य संरक्षणमात्मरंध्रो भीष्मेणासंभाव्यमि
ष्टगुरौवानसमवलिवनेचरेषु। अत्रेदं भीष्मद्रोणयोः संभाव्यमानं धनुर्वेदकौशलमस्मिन्वनेचरेन
संभवतीति निषेधविषयः संभवः। विधिनिषेधविषयो यथा॥ उत्पश्यामि द्रुतमपि सखे मत्प्रियार्थं यिया
सोः कालक्षेपं ककुभसुरभौ पर्वते पर्वते ते। शुक्लापाङ्गैः सजलनयनैः स्वागतीकृत्य केकाः प्रत्युद्यातः कथम
पिभावानंतुमाशुव्यवस्येत। अत्र द्रुतमपि यियासोः कालक्षेपं तपोत्स्यामीति विधिरूपः कथमपि न भवान्गं
तुमाशुव्यवस्येदिति निषेधरूपस्तदेवं विधिनिषेधयोः संभाव्यमानत्वादयमुभयविषयः संदनकैयस्तिर्यग्
भः संसर्पत्पाः सयद्विभवतः स्रोतसिच्छाययास्तास्या स्यानोपगतयमुनासंगमेनाभिरामा। अत्र यदित्थमेवेक
यास्सिद्देवेसास्यादिति विधिनिषेधयोरनवगतेरयमनुभयविषयः संभवः। एते न विधिनिषेधयोर्विकल्पविषयो
पिव्याख्यातः यथा यदि भवति मुखानां वाक्यदेनोसहस्रं निस्पममवधानं जीवितं वाति दीर्घम्॥ कमलमुखि
तथापि त्वमायते त्वत्समक्षं तु सकलगुणविचारः शक्यते वा न वेति। तदेतत्त्रिगदेनैव व्याख्यातं। द्रोणस्य संभवः
स्वार्थाशनेयं वा शान्तो यथा। तथ्यान्येसैमं वप्राहुः सो नु मानात्र मिघते। मिघते तु पथनिश्चयः स्यात्। यथा रूढा
यांगप्रसरमलकैरंजनस्नेहमृ शन्ये प्रत्यादेशादपि वमधुनो विस्मृतभ्रूविलासं॥ तस्यास्तत्रेमयनमुपरिस्पंदि

22A

शंके मृगाक्ष्यो मीनत्तोभाकुलकुवलयश्री तुलामेष्यतीति। अत्र पथास्वर्या द्रोणा। शते पंचाप्यादिति

नियमः नैवं विप्रलंभे अलका नाम कल्पनमनं जनमत्ताः मधुनो वा प्रत्यदेशः सुहृदतल्लाभारंभे वान

यनस्पंदनानि। संभाव्यते वप्रभूतकः रणल्लोकादितियोऽपि विधिरूप एव संभव इति॥ अन्योन्यमुपकारोय

त्तदन्योन्यं त्रिधा च नत। वाच्यं प्रतीयमानं च तत्तोपमुभयात्मकं। अन्योन्यकलिकान्योन्यभातिरन्योन्यमे

कता॥ अन्योन्यालंकृतेरंतस्त्रयमेतद्विहेष्यते। तत्र अभिधीयमानमन्योन्यमिह यथा॥ कंठस्तनस्यास्तन

वेधुरस्य मुक्ताकलापस्य च निस्तलस्य। अन्योन्यशोभाजननाद्भूषसाधारणो भूषणभूष्यभावः॥ अत्रान्योन्य

शोभाजननविन्यासिना उपकार्योपकारकभावस्य द्वयोरप्यभिहितत्वादभिधीयमानमिहमन्योन्यं। प्रति

यमानं यथा। उद्धच्छोपि अइजलंजहजहविरलंगुली चिरं पहिओ। पावालिआवि तह तह धारं तणुं अपि

तणुएइ। अत्र पथिकः प्रपालिकयोर्मिथोनुरागपरैकस्याविरलागुलेनाकरेण पानीयपानमन्यस्याः सुतरां

वारिधारातनूकरणं तेन परस्परमुपकार्योपकारकभावः प्रतीयमानमिदमन्योन्यं। प्रतीयमानाभिधीयमानं

यथा। गोलाविसमोआरच्छलेण अप्पा उरम्मि से मुक्को। अणुअंपाहि दोसेण तेण विसाभार मुअत्र हा। अत्र

गोदावरीविषमावतारव्याजेन तया नस्योरसि आत्मा क्षिप्तः तेनापि अनुकंपाभिर्देषे साश्लिष्टमुपगूढे

त्यभिधीयमानः परस्परानुरागाद्युपकार्योपकारकभावः प्रतीयते इत्युभयात्मकमिदमन्योन्यं। अत्रान्योन्य

चूडिका यथा। शशिना च निशया च [illegible] गगनं भवता च सभा सभया च भवान्

४३

सभयामवलोचनमाभुवनं। अत्र निशाशशिनोः सम्भवतोऽप्यपरस्परमुपकार्योपकारकभावे वर्त्तमा
नयोर्यद्दिग्गगनं जगतीं च प्रतिद्वयोरुपकारकत्वं चूडिके वोपर्युपरि लभ्यते स यमन्योन्यचूडिका। अ
न्योन्यभ्रान्तिर्यथा। जंबूनां कुसुमोत्करे नवमधुन्यास्वपानोन्मदाः कीराः पक्वफलाशया मधुकरीश्चुम्बंति
पुंच्चंत्यिद। एतेषामपि नीलकिंशुकदलेरपिः समानलिपां पुष्पभ्रांतिनिरायतीर्भिसहसा चंचूपमुग्धांग
नाः अत्र जंबुकुंजस्थितमधुकरीश्च शुकशावकं ताली याप पक्वजंबूफलभ्रांतिः पातमधुकरीणां शुक
चुचुकिंशुककुसुमभ्रान्तिः। सयमन्योन्यभ्रांतिरन्योन्यदृष्योव। अन्योन्यात्मकर्त्तयथा। प्रकुल्लताषित्य
निभेरमीषुभिः शुभ्रैश्च सम्पच्छ्यां शुभ्यं तुभिः। परस्परेणाच्छरितामलच्छवी नदेकवर्णाविव नौ बभूवतुः। अ
त्र स्याम यां उनयोः परस्परव्यतिकरेणैकवर्णकरणात् न्योन्यमेकत्वानाघभ्रांतिभेदोन्योन्यादपृथगेव दृश्या।
त्योवत्सको यस्तु यो वा विनिमयो यामिथः परिवृत्तिरिहोक्ता सा काव्यालंकारलक्षणे सा त्रिधा व्यत्ययवती
तथाविनिमयात्मिका। ननयावो। भयवती निर्दिष्टा काव्यसूरिभिः। त्रिधापि चासौ मुख्यामुख्यभेदाद्द्विधाभू
पः षोढा संपद्यते॥ तासु व्यत्ययवती मुख्या यथा कुमुदवनमपश्रि श्रीमदंभोजषंडं त्यजति मदमुलूकः॥
प्रीतिमांश्चक्रवाकः। उदयमहिमरश्मिर्याति शीतांशुरस्तं हतविधिललितानां ही विचित्रो विपाकः अत्र य। २२
त्कुमुदवनादीनामपश्रीकत्वादिकं पश्चाभोजषंडानां श्रीमत्वादिकं मुख्यमेव प्रातरुपलभ्यते सेयं व्य
त्ययवती मुख्या नाम परिवृत्तिः॥ व्यत्ययवत्यमुख्या यथा। जो तो अत्थ हरराउरत्तिं उघासियो पि अत्थमेण

23A

सोऽष्ठि श्रद्धीसहङ्गोऽस्य सवतिरा अरोसुसंकतो । अत्र प्रियतमेन रोत्रावुधासितस्याधररागस्य पर्षे स्व
त्नीलोचने पुसं क्रोतिः प्रागरमुख्या तेन पमुख्या व्यस्य परवतो परिवृत्तिः । विनि यमवती मुख्या यथा प्रस्लोत
मसुरभी शिनिघ्न गयाः क्रीडतो गजवनतपः पयोसि रूत्वा किंजल्काव्यवहितवामदानलेखेह्नतेरुः स्यन्ति
तगंधिभिः कपोलैः । अत्र कीकपोलमदामोदस्या भोजरजः परिमलस्य च समित्सलिलद्धि पवपोलाया ।
न्योर्मुख्यत्वेनैव परस्परोपकारकरत्वादिदं विनिमयवती मुख्यनाम परिवृत्तिः ॥ विनियमे वत्य मुख्या यथा
तस्याच मवयसो जनदापुषः स्वपिरागः किमिह शोच्यते धुना । येव जर्जरक लेवरव्य पानक्रोन मर्म दुकिसोऽज्ञ
लेयशः । अत्र जर्जरकलेवरं दत्त्वा शशिकिरणशुभ्रं यशः क्रीतमिति मुख्यायैव वृत्या विनिमयोक्तेरमुख्येयं
विनिमयवती परिवृत्तिः । उभयवती मुख्या यथा लोचनाधररूतादुग्धा गावासितानन विशेषिनगे धारवारु
लीय परगुणानाम गुणानां व्यत्ययं विनिमयतुषितेनो । अत्र वारुरपापरधरा द्रागोपरूपस्य वस्तु षोनिर्दिष्ट मः ते ने
यं व्यत्यय वती पञ्च मुखामोदवासितयारवामादेन मुखामोदे विशेषितेन तेन विनिमयवती तदिदमुभयथापि
मुख्य वस्त्वेवोक्तेति मुख्येयमुभयवती परिवृत्तिः । उभयवत्यमुख्या यथा ॥ विचित्रे पार्श्वे वेन भूभतः करस्थेक
ताः । देवोपि स्थापितः किं तैर्न पुनः पृष्ठतः कृतं अत्र भूभतानामकरदानां यत्करप्रदानं क्रिमिशी च यत्पृष्ठे हस्त
निक्षेपः स एव द्रव्यगुणहीनो स्यानादि परिहितो व्यत्ययः पञ्चशरे देवेन भूभतः करस्थीकृताः हि देवोपि तैः
पृष्ठतः करदापित इति सोमं दानप्रतिपादनलक्षणो विनिमयः एतत्केवलमुभयथापी पोहस्थित एव वदाभिधेय

त्वादनुभव वसे वोच्यमानमुपलभ्यतरन्तुभयवतोपमयुक्ता परिहारे दृष्टांतः प्रोक्तसिद्धोपः सिद्धे पतन्
न्तिदर्शनं। पूर्वीनरसमत्वेतरजु वक्रेवक्ष्यते॥ तेषु पूर्वमजुयथा। उदयते समविता पश्चे धर्म्मपतिश्रियं
॥विभावपतिभूतीनां फलं सुहृदनुग्रहः॥ अत्रऋजुत्वेमवपूर्वं दृष्टांतपश्चाद्दार्ष्टांतिकं प्रदर्शितमिति दृष्ट
जुपूर्वं चनिदर्शनं सूर्य्यदृष्टांतेन विभूतीनां सुहृदनुग्रहः फलमिति विज्ञापयति॥ तदेवऋजु यथा। पाता
उरी अखिजलि कुरणाइ अवहोजल रजसमवा उम्मि। राकुतेपसिहपि अववि समरसासेवि आउरिसा। अ
त्रापि पूर्वं दृष्टांतः पश्चात्सार्ष्टांतिकं तु यथा पूर्वं निर्दिश्यमानं सविना सुरलय वर्गो षुश्रियमर्प्पयतीति तुल्येति
त्तत्तातामजत्तया शब्देनैवाभिधीयते नैवमत्र किं तर्हि ज्वलनेनेति वृत्तेन तुल्यता तु समुच्चारणमिति वत्त
म शब्दपुक्तिचातुर्यात्प्रतीयते नेत्रदिदं पूर्वं च वक्रे घनिदर्शनं॥ उत्तमजुयथा हि अग्नि तिरछोप इस मुहय
छागहि अक दकूवा पहि अए कज्जे गोरडीसांच उरउ वछ। अत्र। ऋजुत्वाशब्दत एवाभिधीयमानसा
धर्म्यदार्ष्टांतिकमभिधायोत्तरकालं दृष्टांतोभिहितः तदिदमुत्तरमजुनिदर्शनं। तदेववक्रंयथा। उपरि
घनं घनपटलं दूरे दयिताकिमेतदापातितः हिमवति दिव्यौषधयः कोपाविषाः फणिशिरसि॥ अत्रा
पि दार्ष्टांतिकमभिधायोत्तरकालमेव दृष्टांतः किंतु यथा पूर्वास्मिन दर्शयतीति यतित्वा शिभिः सर्ववा
ऋजुत्वा साधर्म्याभिधाननेवमत्र तथापि तु किमेतदेतद्दापतितमिति युक्तिचातुर्य्येणावि पर्ययेणच
लिंगसंख्या यथा संख्या तो तदिदमुत्तरं वक्रनिदर्शनं॥ सममजुयथा। पाति वेद्रांशुभिः सह छाध्वांतरा

24A

जीयराभवं । सदोराजविरुद्धानो दर्शयंती दुरंततां । अत्र राजविरुद्धानामिति श्लिष्टपदेन दर्शयंतीति
वर्तमानकाललक्षणात् । सरयूरिति तद्वितेन समकालमेव दर्शयंतरादर्शतिकयोः शब्दतः अत्र जूसमेवो
क्तत्वादिदमजुसमं च निदर्शनं । नदेवबकं यथा रादुणावरको अं उ इं इ एसुनि माणुसेविए मे अ ।
गुणवत्तिए राजा अरवंसुप्पत्ते विटकारो अत्र न केवलं कोइंदइंदुक्के माणुसेष्वेवमेवेतरेतरयो
गवर्दर्केतयासुगपदभिधानं गुणवर्जितवंशोत्पत्ते विटकारो न जायक इति । श्लिष्टपदत्वेपि व्यति
रेकमुखेन गुणवत्याश्चाभिधानाद्बुधीवमानुषेपि गुणवत्येवमहानशब्दो भवतीति वक्रोक्त्या साध
र्म्यावगतिः ॥ तदिदमशब्दत्वाद्भिः पूर्वाभिः समानं सधर्मं वक्रं च निदर्शनं । शब्दोपाते प्रतीतिवासादृश्ये
वस्तुनोर्द्वयोः । भेदाभिधानं भेदस्य व्यतिरेकश्च कथ्यते ॥ स्वजातिव्यक्त्युपाधिभ्यामेको भयधिधा च सः
। सादृश्यात्स्वभिन्नः पोढाभिजायते तत्र शब्दोपात्तसादृश्ये स्वजातिव्यतिरेको यथा ॥ अरत्नालोकसंहा
र्यमवार्यं सूर्यरश्मिभिः । दृष्टिरोधकरं यूनां यौवनप्रभवं तमः अत्र यौवनप्रभवस्य तमसः तमोजात्या
सहदृष्टिरोधकरमिति सादृश्यमुक्त्वा अरत्नालोकसंहार्यमवार्यं सूर्यरश्मिभिरिति व्यतिरेको निहितः ।
सोयं स्वजातिव्यतिरेकः । प्रतीयमानसादृश्ये स्वव्यक्तिव्यतिरेको यथा । असुस्त्वं हि सन्नरि असर अहिं
असुद्दिट्ठिआवट्ठिअमाणु । अप्फुलविगालमहु पि अहं अ्दु व्वारेरासमाणु । अत्र प्रतीयमानसा
दृश्योपचरितभेदात्मव्यक्तेरन्येरन्ये शसुचरितशतै [illegible] बनेदोभिहितः सोयं स्वव्यक्तिव्य

तिरेकः। शाब्दावानसादृश्यस्यैकव्यतिरेको यथा प्रियानेत्रवत्सुसन्नाभिसन्नतभूतिस्तवापि स्मिराहृगयोभ
वन्तयीभवतविभूधरभुवः सम्प्रगाहितः दरभनिर्व्याजेन परमेश्वर स्तुमिपतन्नोयासिवर्जुजनेहेलोला
सितवाहिनीयमपर्यने यत्रो विषादी भवान्। अत्राभियवद्घत्वादिभिरभिहितसादृश्ययोरुपमानो
पमेययोरुपमेयस्यैव यथोक्तसादृश्यविषये विषादित्वयुक्तमित्येकव्यतिरेकोऽयं। स एव प्रतीय
मानसादृश्यो यथा सकलैकेन जडेन च सा यस्य दोषाकरेणानेकीकृतः। अभुजंगः समनयनःक पमु
पमयोर्हरेणासि॥ अत्र प्रतीयमानसादृश्यस्य पूर्वार्द्धे चन्द्रायमानस्य सकलैकत्वादिहत्तरार्द्धे च वरो
नीयोपमेयस्या। भुजंगत्वादिरेकस्यैवनेत्रकःस्वसौमिहितत्तेपमयोकव्यतिरेक एव। शाब्दो यातसादृ
श्ये उभयव्यतिरेको यथा॥ अभिन्नवेलो गंभीराम्बुराशिर्भवानपि। असावंजनसंकाशस्त्वं च चामीक
रद्युतिः। अत्र द्वयोरप्यभिधीयमानसादृश्यमुपमानस्योपमेयोरपि पृथक्पृथक्मेदतः स्वधर्मोऽभिहितः सो
यामभिधीयमानसादृश्ययोरुभयव्यतिरेकः। स एव प्रतीयमानसादृश्ययोर्यथा। त्वन्मुखं पुण्डरीकं च
द्वयोरप्यत्र योर्भेदः। कमलं जलसंरोहं त्वन्मुखं त्वदुपाश्रयं। तदिदं नन्दिगर्द्दने वव्याख्याते॥ सोऽयं प्रती
यमानसादृश्ययोरुभयव्यतिरेकः। अभिधीयमानसादृश्ययोः सदृशो व्यतिरेको यथा त्वन्मुखं पुण्डरीकं च पु
ल्ले सुरभिगन्धिनी भ्रमद्भ्रमरमंभोजं लोलदृष्टि मुखं तु ते। अत्र मुखाम्भोजयोः फुल्ले सुरभिगन्धिनी इ
तिपदाभ्यामभिधीयमानसादृश्ययोः सदृशमेव। भ्रमद्भ्रमरत्वं लोलदृष्टित्वं च भेदकमुत्यन्यस्तमि

२५

९५A

ति सोयं शब्दोपात्तसादृश्ययोः सदृशव्यतिरेकः ॥ स एव प्रतीयमानसादृश्ययोर्यथा । चंद्रो यमेवरोते सो
हं सोयं नीयभूषणः । भमीनक्षत्रमालाट्य भिमुन्लुमुदं पपः । अत्र पूर्वार्द्धे चेन्द्रहंसयोः प्रतीयमानसा
दृश्ययोरेवरोचित्तं सत्वनीयभूषणत्वे उत्तरार्द्धे न तु नभः पयसोनक्षत्रमालित्वोकुमुदत्वे सदृशे एवमेदके
सोयं प्रतीयमानसादृश्ययोः सदृशव्यतिरेकः । अभिहितसादृश्ययोरसदृशव्यतिरेको यथा । शशाम
वृद्धिमेधानमुत्संगेन स्पभूभवतः । विरामस्य धीरासंततिरप्यूरगाः । अत्र भूभत्पदेन साक्षादुपात्तसादृ
श्ययोः शममात्ववतोयोपमुत्संगे समस्ताम्बुधारापातो यश्च भेद्यवृक्षेरभावस्तस्मिदमुभयोरसदृशंमेव
भेदकं सोयमभिधीयमानसादृश्ययोरसदृशव्यतिरेकः स एव प्रतीयमानसादृश्ययोर्यथा ॥ अधूवि
लासमस्पृष्ट मदरागं भंगे त्वया इदं तु न पवद्धे हंतवनत्रुरणाभूषितं । अत्र कांतामृगेक्षणयोः प्रतीमा
नसादृश्ययोर्भ्रूविलासमंदरागोनदभावोचविसदृशो भेदकाविति सोयं प्रतीयमानसादृश्ययोरसदृशव्य
तिरेकः ॥ सदृशासदृशव्यतिरेकाभ्यामेव तदुभयव्यतिरेकोपि व्याख्यातः यथाभिर्नलेंदुनभोरंजेविकचा
बुजे वभौ सरः परं पर्यश्रूवदनो मम्लतुभ्रातरावुभौ । अत्र नभः सरसोः प्रतीयमानसादृश्ययोर्निर्मलेंदुवी
विकचाब्जत्वे च प्राग्वदेव सदृशो भेदके ताभ्यां च म्लानचंद्रमुखकमलाभ्यां मनोहरत्वा हृदकत्वाभ्यां च
प्रतीयमानसादृश्ययोरेव रामलक्ष्मणयोर्धैर्यमुखं पर्यश्रुतातनौ वम्लानिः निर्मलेंदुताविराजमा
नत्वयोर्विकचाज्जत्वशोभमानत्वयोश्च सावि सदृशाविति सोयं सदृशाभेदकत्वेन तमेदएव तदुभयव्य

तिरेकः। एतेनैकव्यतिरेकादिसंभेदोऽपि [illegible] भुजेनेत्यत्र भविभवैः कल्पद्रुमैः स्पर्द्धते
नहीनं भुवनत्रयाभयमहासत्रीकृपाणं च मे। तुल्यस्तत्र म[illegible] यागादिष्वपी वस्तेति द्वेकांतरेकायांत
र्विनिवेश्य विश्वमखिलेषां तोसुरोते हरिः। अत्र वर्णनीयवाहुकल्पद्रुमयोरभिमतं कलदायित्वादिभिः
प्रतीतसादृश्ययोर्भुवनत्रयाभयसदायी वर्णनीयवाहोः कृपाणोभेदक इति एकव्य[illegible]रेकः। तथा वर्णनी
यवाहोः प्रयागवटस्य च प्राग्वदेव प्रतीयमानसादृश्ययोरेकस्य भुवनत्रयाभयमहासत्रीकृपाणः शा
खसुप्तेते अन्यस्य महाप्रलये स्वकायांतर्निवेशिताखिलाविश्वो वैकुंठः तावित्येतयोः सदृशमेव भेद
को हरिकृपाणयोर्वा श्यामतादिभिः प्रतीयमानसादृश्ययोरभावेव धर्मभेदकोऽसावयमेव प्रकारो व्यतिरेक
संकरगतोपः। स्वजातिव्यतिरेके यतिमानसादृश्यं स्वव्यक्तिव्यक्तिव्यतिरेके चाभिधीयमानसादृश्यं पर्यु
दाहरणं द्रष्टव्यं ते संभवति वा न दातव्यमुदाहर्त्तव्यं ११ कार्यारंभे सहायाप्तिर्दैवाद्दैवकृतेह या। अकस्मिकी बुद्धि
पूर्वेभयी वा तत्समाहितं तत्राकस्मिकी दैवकृता यथा। मानमस्या निराकर्त्तुं पादयोर्मे पतिष्यतः। उपका
राय दिष्ट्येदमुदीर्णं घनगर्जितं। अत्र माननिराकरणोपक्रमेऽयकालोऽत्यत्र स्याकस्मिकघनगर्जितस्य मानवि
ध्वंसे सहकारित्वादाकस्मिकी पंदैवकृता सहायसंपत्तिः आकस्मिकी वा दैवकृता पतायथा। अनुष्णासतमि २६
त्यनाकुलेन यवतत्सर्वोकुलमर्जुनात्मजे। स्वयमर्थ इवाभिवांछितस्तमभीयाय पराशरात्मजः अत्र भीमानुशा
सनोपक्रमकाल एव व्याससागमनस्य तदुपकारित्वादाकस्मिकी यमदैवकृता सहायाप्तिः। बुद्धिपूर्वा दैवकृ

27A

गोमयात्तथाप्ति कालिकत्वादूनोहतारगलिः। यथाश्मल्याव मपीनामपि नरीनां वराकास्तु खोजातः ह
न्यासादि जसभ्मावम ॐ ई ई शाविरगणापरमुहोजाश्री। अत्र पारमार्थिको प्यपि नदीषु मगतस्याप्र
सारितः सत्यमगः षपः पातुंप्रतिः पघते प्रत्युतत्पजतितेने यंतत्वेप्यतत्वरूपाहनहेतुर्भ्रांतिः। नत्वेअनत्व
रूपोयादानेहेतुर्यथा। समर्थयेतत्पमयमंप्रियाप्रातिष्ठरोननन्मोपसितिनतेन्यथा। अतोविनिद्रिसमावि
र। लोचनेनकरोमिनसस्पर्शविभाविताप्रियः। अत्रांगीकृतललनारूपोर्वशीपयि व्यगसुखनिमीलितात्तस्य
गुरुरवसः शापेनाविर्भूतसमरूपायामापित स्यापेपं पूर्वानुभूतैवंविधानेकविप्रलंभसंभावनयानयोर
नुन्मीवनवुद्धिः सयेतत्वेप्यतत्वरूपोयोदानेहेतुः भ्रांतिः। नत्वेपातन्वरूपोयेक्षाहेतुर्यथा। विकसंयानकृत्रिम
यात्रिपत्रैः कपोतपालीषुनिकेतनानं। मार्जारमप्यापतनिश्चलांगंपक्षानतः कृत्रिममेवमेनो अ
त्रतत्वरूपोपिमार्जारिकृत्रिमोयमिति बुद्ध्याजातायांतस्याप्रयोजनत्वेन यदुपेक्षणंसेयंतत्वेप्यतत्वरूपोपेक्षा
हेतुर्भ्रांतिः। भ्रांतिमान्त भ्रांतिमालाच भ्रांतेरतिशयश्चयः। भ्रान्त्यन्य थावसायश्च भ्रांतिरेवेतिमेमतंतत्र
भ्रांतिमान् यथाकपालेमार्जारः पयइतिकरालेटिशशिनस्तरुच्छिद्रप्रोतान्विसमितिकं [illegible] संकलपतिरता
तेनलेपस्यान्हरतिरूपिताप्युकमितिप्रभामत्तश्चंद्रोजगदिदमहोविभ्रमयति। अत्रैंदुमरीचिस्तुयशः प्रभृति
भ्रांतिभूर्या यभ्रांतिमान्नाममन्ना मर्थो तेरस्पेद्धः भ्रांतिमाला [illegible] वरसंकथानजयोर्वधूकबुआरध
रयोस्तो यद्धिया मधूककुसुमभ्रांत्यातत्पागे [illegible] मध्वामोहजातस्याद्गू [illegible]

पूर्ल

मधुपाः किं वेत्ति तरलोऽस्यानानि रहिष्णसौ ॥ अत्र मुखस्य पद्मे वेमु...नादिषु मधुव्रतानां येयं नीलोत्पला
दिबुद्धिः सेयं मालत्क्रमेण पतायमाना भ्रांतिमाला भ्रांतेरेव भेदः भ्रांत्यतिशयो द्विधा । वितर्कहेतुर्विप
र्ययश्च तयोः पूर्वं रूपमाभ्रांतिमाचक्षते । द्वितीये तु भ्रांत्यतिशयमेव तत्रोमाभ्रांतिर्यथा । हतो बसंते नयनो
द्दविद्रुमनिर्मग्नेनाभो नियतहिंक्तेः । चुलेहषामिन्नगतेरशोसयंशुकोदरध्यानमिदं स्तनांशुके । अत्र
शाद्वलेपि समुत्पन्नस्तनांशुकभ्रमस्य पुरूरवसः योयं सादृश्यातिशयितो वितर्कः सेयमुपमा भ्रांतिः भ्रांत्यति
शयो यथा । द्विषदुर्जनरिजूरकोरिसारितिज्योत्स्नालवो भासि नीशशांको कलिकाजलभ्रमिवशाद्धा
मन्वनयामुदं शायाते चन्द्रकरीन्द्रमेण मुकुलीकुर्वं मृणालीं मुहुर्मुहुर्हंसस्समहिर्जिघत्सतितमामाकुंचन
प्राचनैः अत्रे गंगाभः प्रतिफलितं तारनिकरं कलामालोकयतो वासुकेर्यशः परीन्द्रमेण मुकुलीकुर्वन्मृणा
लाशफरीपभिन्नश्चासिताविपर्ययबुद्धिः सोयं भ्रांत्यतिशयो नाम भ्रांतेरेव भेदः । भ्रांत्यनध्यवसायोपि द्विधा
सालंबनो निरालंबनश्च तयोः सालंबनो यथा विरहिणीहृतं अहरहतरहिणीस्या अरुणनकुमारिणी । छा
रुजार अलिनीच हेहिश्चेते रानपूत्रवरो । अहनानुविमर्श्य देहिसोसंदारिणा । अरुजहरणावलंबना अवे
णजेकजाणिअ रश । अत्र नकदयो नाम्नो नजेबूरिति स्थापने इतित्र पारणामेवालंबनभूतत्वात्सालंबनो नामा
यं भ्रांत्यनध्यवसायो भ्रांतिभेदः ॥ निरालंबनो यथा । उभौ रंभास्तंभावुपरि विपरीतौ कमलयोस्तदूर्ध्वं रत्नाश्मस्थ
लमपदुरूहं किमपि यतः ततः कुंभोपश्चाद्विसविसलये कंदलमये नवद्विदाविंशी वरमधुकराः किं पुनरिदं ॥

२४A

अत्रोर्वशिषु पुरूरवसे वेनुउत्पन्नारंभात्तिभ्रांतेर्योयमनतत्समुदायेति किमिदमित्यालंबनं विना कोपि न।
अवसायः। स एष निरालंबनो नाम भ्रांत्यनध्यवसायो भ्रांतेरेव भेदः। ऊहो वितर्कः संदेहनिर्णयोत्तराधि
ष्ठितः। द्विधा सो निर्णयांतश्चानिर्णयांतश्च कोप्येतत्त्वानुमानीयश्चोभयात्मकः स निर्णयांत इतरो
मिथ्या मिथ्योभयात्मकः। तेषु निर्णयस्यानतत्त्वानुपातीयथाभेनाकः किं मयं स्तनाद्विगगनेमन्मार्गमव्याहत
ते शक्तिस्तस्य कुतः सवज्रपतानाभिशितो महेन्द्रः पितापि नसोपि समंनिजे न विधुना जानातिमोरावणो आत्मा
नेसजटायुरेव तस्मात्क्रिया वधं वांछति। अत्र निरूपितलक्षणो वितर्कः जटायुरेव इति तत्त्वानुपाती निर्णयां
तो वितर्कः। स एवातत्त्वानुपातीयथा। अस्याः सर्गविधौ प्रजापतिरभूच्चंद्रो नु कांतिप्रदः शृंगारैकरसः स्व
यं नु मदनो मासो नु पुष्पाकरः। वेदाभ्यासजडः कथं नु विषयव्यावृत्तकौतूहलो निर्मातुं प्रभवेन्मनोरममि
दं रूपं पुराणो मुनिः। अत्र किमिदं रूपं निर्मातुं यथोक्तः पुराणो मुनिः प्रभवेदनश्चंद्रादिरन्यतमेन प्रजापतिना
भवितव्यमिति अनतत्त्वानुपात्ययं निर्णयांतो वितर्कः। स एवोभयात्मको यथा। चित्रानिवेश्यपरिकल्पितसत्व
योगाद्रूपोच्चयेन रचिता मनसा कृता नु। स्त्रीरत्नसृष्टिरपरा प्रतिभाति सा मे धातुर्विभुत्वमनुचिन्त्य वपुश्च तस्याः
सोयं तत्त्वानुपातित्वादतत्त्वानुपातित्वादतत्त्वानुपातित्वाच्चोभयात्मा निर्णयांतो वितर्कः। अनिर्णयांतो मिथ्या
रूपो यथा। अद्रेः शृंगं हरति पवनः किंस्विदित्युन्मुखीभिर्दृष्टोत्साहश्चकितचकितं मुग्धसिद्धांगनाभिः स्था
नादस्मात्सरसनिचुलादुत्पतोदङ्मुखः खं दिङ्नागानां पथि परिहरन्स्थूलहस्तावलेपान्। अत्र किमिदं मद्रेः।

ऽंगेपवनोद्धतनीनिमेषमतिकल्पनायामिथ्यात्वादस्त नन्त्रानिर्णयाहनिर्णयान्तो मिथ्यारूपो वितर्कः ।सए
वामिथ्यारूपो यथा। अयमसौ भगवानुन्नतो ऽवः स्थितमया स्तुलिताग्र शिमोलिना ।।समधिरूढमनेनतु
जिम्मुनास्थिद्रिति वेगवशान्मुमुंहुर्गरोो ।। अत्र भगवत्यार्पयोर मिथ्यारूपतेनवेगवत्वादेकस्यानिर्णया
न्तोमिथ्यारूपोवितर्कः अनिर्णयान्तउभयात्मायथा। मयास्विदेषामतिविभ्रमोनाथवस्तेनुमेयोग्यमुनारम
णः।।गाहोवमुज्ञाहियथ्याधुरामे परोक्रमेनेनशशः क्रियते। अत्र मायाद्दीनाविकल्पानांमिथ्यारूपत्वान्मम
शमः क्रियतेनन्वाप्रियंनदत्यस्यामिथ्यारूपत्वादनिर्णयोनस्वात्वायमपनिर्णयोन उभयरूपोवितर्कः।। वस्तुन
रतिरस्कारोवस्तुनामीलितंस्मृतं। पद्दिताऽपिहितावेव तदुणात्तद्गुणो चतत्।अत्रामीलिधावमानगुणेनप्रती
पर्याणगुणेनचवस्तु नामेभवति।तयोराद्यो यथा ।।एवंतो विरासक्तविभ्रमोगोसेपसरतयल्लवारुणयाश्री।।म
ज्ञाणं वेसुमथ्यान्तम्मरहंतं वेसुलोअरोणसु अमरिसो।।अत्र मज्जनताम्रयोर्लोचनयोर्मद्यरागः मदताम्रयोः
कोपानुरागः।सासारमभिधीयमानेनैवगुणेनतिरस्क्रियमाणोनिर्दिश्यमानः त्वभिधीयमानेनवस्तुनैवनन्निमीलिता।
प्रतीपमानेनयथा।पिअदंसणेणसुहरसमउलि आजरसेराहोतिणअणाइं।ताकेणवस्सरइअं लक्खिअइ
रकुवलअंतिस्सा अत्र प्रियदर्शनसुखेनमुकुलितयोरेवलोचनयोस्तस्याः कर्णकुवलयंलक्ष्यते।एवंमुकुलित
योरितिवस्तुनावस्त्वंतरतिरस्कारः प्रतीयमानगुणेनयोपपादितइतिप्रतीयमानगुणेनवस्तुनामीलितमिदंपि
हितंयथा।पार्श्वे [illegible] यह सम्भ्रमंतीअजरस्सुमंदिट्टो।सवरणवावडाएसअस्सोविजरणोतहच्चम।अत्रप्रव

रितस्नेहविभ्रमं तया त्वामवलोकनेन तदन्योजनो न जानातीति सर्वत्र स्निग्धदृष्टिपातेनापिहितमयो तन्मी
लितभेद एव। अपिहितं यथा। दिट्ठा रूजेण दिट्ठो आलाविआ एविजेन्न आलविओ। उवआरो इअथा
यन्न इ पच्चालपितया पत्यालपितः। उपचारोपन्न कृतस्तस्ये कालितेविदग्धैः स्पकओ तवि अकलि
अंण रहस्सादि। अत्र दृष्टयापन्न दृष्टः संभाषितया पत्न्या संभावितः नाचा यागतो पचारोविहितस्तेन तद
नुरागः परेन पिहितः प्रस्तुत छादनेन रूपकानां प्रकटितरहस्यपिहिताख्योयं मीलितभेदः। तद्गुणो यथा। गो
रोउत्तरंगो अराजो हत्थोइ अहिसारसि अरोणवध्यदि छइ वल्लह वइरडा तथा अहिहिसुरा वल्लिपत्र
उ साम्मलगनिहिंरीलवसवहतिहिम अराणमति अहिं। अत्रो रागस्तरुणीजनः सितनेपथ्यो ज्योत्स्नायां श्या
मलं नीलनेपथ्यः तस्य छायासु गच्छतीति। तद्गुणश्च पमीलनात्तद्गुणस्त्वं मीलितमिदं। अतद्गुणो यथा।।
कर्कंधुफलमुच्छिनोति शबरी मुक्ताफलाकाङ्क्षिणी कुद्धो मूकमकंदवरकस्य पुरतः काकोपि हंसायते। कीर्त्यातिध
वलीकृते त्रिभुवने स्माभुवनेस्मा यालल स्मीः पुरः केसेवा स्पवं लोपमिन्तु पहितश्रोतुं शनैर्जल्पति।। अत्र
कर्कंधूफलानामपगतनिजगुणात्वात्तद्गुणस्त्वं मीलितमिदं। सदृशाहृदयविंनादेरनुभूताप्यवेदनेस्मरणं
प्रत्यभिज्ञानेस्वप्नावपि न महद्भिः। तत्र सदृशार्थं यथा अदृष्टपन्न पुवृत्ते न सेला।। खंजनयं तयः। असमर्थं
तविशलिष्वस्प प्रियानयनविभ्रमाः। अत्र खंजनं पश्यति दर्शनात्तत्सदृशप्रियानयनविभ्रमस्मारणात्तस्य
दृशदर्शनजं स्मरणमिदं। अदृष्टाच यथा मुनिसुतामरावयस्य... तेनाधिनाममविप्रयुक्तमिदं तमसामनः मन।

सिंजेनसर्वेप्रहारिणा नाधनुष्किंकृतं रमे स्मारिवेशितः । अत्र [illegible] भ्रमराग्रसानि रोधिता नमस्ताभिमनो विधु
न्तमित्यत्र ब्रह्मदेस्मरणमिदं । स्विनया यथा । पुरा यत्र स्रोतः पुलिनमधुना तत्र सरितां विपर्यासं यातो घनवि
रलभावः क्षितिरुहां । बहोर्दृष्टं कालादपरमिव जातं वनमिदं निवेशः शैलानां तदिदमिति बुद्धिं द्रढयति । अ
त्र प्रत्यभिज्ञाया अपि श्रोतःसरित्पुलिनादियुक्तस्मरणस्य चिन्ताजन्यत्वात् दृष्टिचिन्तोद्भूतं स्मरणं । आदिग्रहणात्प
रमप्रयत्नाद्यथा । दर्शनपथमायाता साक्षादिव तन्मयेन हृदयेन ।। स्मृतिकारिणा त्वया मे पुनरपि चित्रीकृता
कान्ता । अत्र परस्त्रकृतात्मप्रयत्नविशेषादिदृष्टितायाः प्रभवत्वादिदमपि स्मरणमेवास्वभावप्या ।। ज्ञाने स्वप्न
विधेममाघ खलु केन स्वेके पुरस्ताद्भूत्र नूपोपरिवेपमें तुलमिव ज्योत्स्नाधमस्त्रेमर । तस्यां तत्रैव निस्सुधी
कृतसंरंभोऽङ्घ्रिमीरं गते केह ध्वाकान्तवलाद्बलात्कृतवती साम्यंपूंमनरापं । अत्र स्वप्नस्य चिन्तादिजन्यत्वात्स्व
प्नस्मृतिरपि स्मरणमेव । प्रत्यभिज्ञाने यथा । गृहीतोपः पूर्वं परिणयविधौ कंकणधरः । सुधामूर्तेः पादैरमृ
तशिशिरैर्यः परिचितः । स एवायं तस्याः स्तनदिनरकरो यम्मसुभगो मया लब्धः पाणिर्ललितलवलीकंदलनिभः
।। अत्र गृहीतोपः पूर्वं स एवायं तस्याः पाणिरिति प्रत्यभिज्ञानमपि स्मरणमेव । अभिप्रायानुकूल्येन प्रमाति
भीव उच्यते । सोभेदो यथा निहन्ते दश्यैकनश्चामितश्च सः । तत्रैकतः सोभेदोदाय था ।। गेहं पलोएह इमं किम्म
सिथ्यवणापि अस्स अमेर । घरिणी सुस्सपरमुति समदन्तजु अलंकि अंवोर । अत्र मुनस्य देतो दृमादह
मुपभोगयोग्या स्मातिगृहिणा एवमभिप्रायः प्रकर्षविकासि नयनतयो भिद्यते न पुनः प्रत्युरित्येकतः स

भेदोयंभावः अभिहितः सोभेदोयथा। सालोएच्चिअसूरेघरिणीघरसामि अस्सघेत्तूण। णेच्छं
तस्सविपाए धुअइ हसंतीहसंतस्स। अत्र सालोक एव सूर्ये गृहपतेर्यद्गृहागमनं गृहिण्याश्च पत्यादर्शा
वनं नदाक्षावाक्यामपिवेश्मनोननिर्गंतव्यमिति भावः स्वच्छयोरपि हासेनाभिहित उभिव्यक्त इत्यभितः
सोभेदोयंभावः। सकृतोनिरूभेदोयथा शालिवणगोविआए उड्डीवंती। अपुंसविदाइं। सघणसुंदरी
एविपहिआ अच्छीइं पेच्छंति। अत्रातिसौन्दर्य्याद्देवीभ्रान्त्या शालिवनगोपिकाया अवलोकयता पथिकानां
नदृक्षिनिरीक्षणे अयमभिप्रायः शालिवनतिरस्कारेण देवमानुषयोर्विशेषभूतः पदामेवभूमिस्पर्शो
भूमिस्पर्शोवानलक्ष्यत इतिनदंतिणं एवपश्यामः यदीयंनिमिषति न दा मानुषी यदिनाविनिमिषति तदा देवी
मिति सर्वांगसुंदर्य्या अपिपथिकानामेव जायमानोनेहकेनचित्कर्मणाभिव्यक्त इत्येकतोनिरूभेदश्चापं
भावः अभितोनिरूभेदोयथा। गोलाअडट्ठिअं पेच्छिऊण गहवइसुअं हलिअसोण्हा। आढत्ता उत्त
रिउं दुक्खुत्ताराए पअवीए। गोदातटगच्छंतीहालिकस्नुषा दृष्ट्वा गृहपतिसूनोर्गोदावरीतटे पदवस्थानेप
श्चानमवलोक्य तस्या दुत्तरमार्गेण वनसारेभसूत्रायंतयोरभिप्रायः हस्तावलंबदानेनानयोरंगसंगः स
पद्यतामिति स चाभितोद्वयोरपि जायमानोनेहकेनचित्कार्मणाभेदघातेत्याभितोनिरूभेदश्चापंभावः।
दृष्टं सूक्ष्मं चाभिधेयेन निरिभावात्प्रपंचनम्॥ रचोदाहरणान्यत्र तेषिदंप्रतिपाद्यते॥ हिअएरोसुम्भिसंमच्या
अपाहरं सिरेणपत्नीतो। राहनुदस्सोमाणोमिसिणीपयोरं [illegible] अत्र हृदये उत्पाद्य प्रहाराणाद

येशिरसाप्रार्थितया नम्रतया मौनतया इति तत्तन्हृदये वल्लभ वसतीति भावः सच प्रार्थनारोदनाभ्यामनुमि-
यमानः सोऽयं द्वेधा बोधहेतुवद् दृश्यतेऽग्निरूपे देवता योभावः सस्पष्टतोऽन्विगम्यते। इंगिताकारलक्षणात्
सूक्ष्मात्याम् निबोधते यथा काशीसो संगमोभावीलावीरं विजुम्भते मम। अवेत्यै केनमवलानीला यत्रान्यमी
मिलत। अत्र वस्तुमस्फुमतायामिंगिताकारयोरपि प्रतीयमानत्वाद्भावः वगते महोमिका वरीमस्भवति॥ यथा
संमीलनन्यासप्रचितोऽग्निशिसेगमः आश्वासपितुमिच्छत्याश्रिपमेगजपीडुते। अत्रानुकार्यानुकरणोऽपि भू-
मिकां नरिते एवमवनद्धनिसोयं निरूप्ये द्वेधा बलवसूत्मद्रुत्युच्यते। मनसा मनसि जे स्थाने मानसे चाभिधीयते॥
स्वानुभूतिभवे चैकमुपचारेण कथ्यते। तत्रापि सजोह्द्विधा। युगपदेकशश्च। तयोर्युगपद्यथा। क्रीतकाननवद्
नप्रतिविवे भग्नवालसहकारसुगंधो॥ स्वादुनिप्रसिक्षिनालिभिःशीतेन निवेवारमपुनोंद्रियवर्गः। क्रमे-
णाश्रवणे रसुखमातेरविंवसोगंधास्वादुना अव्याप्तशोत्या नोदकृ घ्राणरसनश्रवणत्वगिंद्रियप्रत्यक्षता
प्रतीपन्ने एकशो यथा॥ मंदमंदविगलन्नयमीपश्च नूतनरूपलसितपक्ष्मदधन्या। वीक्ष्यते स्म यमनेके निर्वबध्या।
कामिनोमुखमधोमुखयेव। नदित स्नापुमेवं श्रावणादीन्यप्युदाहरणीयानि। मानसमपि द्विधा। सुखा-
दिविषयमनुभूतार्थविषयं च। तयोः सुखादिविषयं यथा। अस्तोकविस्मयमविरिवित्त नपूर्वरत्नमुभूत
तनूतनमपच्छन्नजर्जरः ऐनः एकक्षणानुदिनसंघटितप्रमोदमानं दृशोकशवलत्वमुपैति चेतः। एतन्नि-
गदेनैव व्याख्यातं। अनुभूतार्थविषयं यथा। पिहितेकारागारे तमसि च सूचीमुखानुम्हतिभवं द्विधा॥

31A

मिथ्यात्मकममिथ्यात्मकं च तमेमि मिथ्यात्मकं यथा । अथ दीर्घितरं नमः प्रवेक्ष्यन्सहसारु रागरयः सासं
भ्रमेरा नियतं नाभिवोष्ठरश्मिमुखं विलयीभूतनन्तु धर्मान्वमेने । नादृष्टाभिदृष्टियेषु मनस्विनान्वरतिम मा
ननात्मन्येवावतिष्ठते । अमिथ्यात्मकं यथा मनः प्रत्यक्तितेसमिधमवधायान्नमरुतः प्रदूष्य द्रोमारणः
प्रमदसलिलीन्सेचितदृशः यदालोकात्क्रूराद्द्रवनिमज्जामनमयेद धर्मतत्त्वं किमपि यमिनस्तत्कि
लमवाइ । अस्यात्मविषयतावस्के वयोगाभिरूढीयता लिंगाद्यल्लिंगिनोज्ञानमनुमानं तदुच्यते । पूर्व
वच्छेषवच्चैवदृष्टं सामान्यतश्च यत् । फलसामर्थ्यभेदेन हि द्वैतविद्यते पृथक् । उदाहरणमेवैषां हेषे
यतमेभविष्यति । तेषु यत्र कारणं दृष्ट्वा कार्यमनुमीयते तत्पूर्ववद्यथा । अविरलविलोलजलदः कुटजा
र्जुननीपसुरभिवनवातः अयमायातः कालो हेतहता॰ पथिगगोहिनः । अत्र वर्षर्तौ कारणभूतात्कार्यभू
ते विरहीणां मरणमनुमीयते तेनैतत्पूर्ववै कारणमिहास्तीति पूर्ववदुच्यते यत्र कार्यं दृष्ट्वा कारणमनुमी
यते तच्छेषवद्यथा । सावज्ञमगामिथ्यनूनं पतितो सिपादयोस्तस्याः कथमन्यथा ललाटे यावकरसतिल
कं यत्निरिपं अत्र पावकरसतिलकयंक्तेः कार्यभूतायाः कारणभूतापादपतनमनुमीयते । तेनेतच्छेषः का
र्यमिहास्तीति शेषवदित्युच्यते । यत्र न कार्येन कारणं केवलमविनाभावमात्रं प्रतिपद्यते तत्सामान्यतो दृष्टं य
था । गर्जन्ति खे मेघाः फुल्लाणीव पराणि [illegible] आमोदिताः [illegible] होचे दुर्जुञ्जो [illegible] वासरतो हल्लायते । अत्र वर्षर्तुरविना
भूते मेघगर्जितादिभिः सामान्येनैवानुमीयत इति सामान्यतो दृष्टम् [illegible] तान्येतानि भावसाधनेनुमान

णो हि केवलपक्षेण उदाहरणानि [illegible] यदा धूमः कारणसाधनेनानुमानं न शक्यः तदानुमीयते अनेनेत्यनुमा
नं शक्यं न यथोक्तं लिंगमुच्यते यदाह अनुमेयेन संबद्धं प्रसिद्धं च तदन्विते । तदभावे च यन्नास्ति तल्लिंग
मनुमापकं । तत्पूर्ववदिति यथा । अत्र गाहि वकुलादि विशिष्टे हि हिमि जो तस्य मन्यमानं [illegible] अत्रेन दृष्ट दि
ष्टिगामाषि वलिए गालक्षिणा अत्रैवं प्रकारया व्याख्या एवंविधेन दृष्टेन नोपलक्षितानां मयूराणां
त्रेकृष्ण विप्रसीति कारणानो पत्र कार्यानुमानेन तद्दिष्टे दृष्टसामग्री पक्षे पूर्ववदित्युच्यते । शेषवदिति यथा ॥
दीसहस्राणि अमंडलं अताराणां अवाङ्मलं अगंधवहो एते वसन्तमासे समाहृत्य मुकुन्दरि अत्रैव अत्रो
तो रालक्षणेन कार्येण वसंततः कारणभूतोनुमीयते इति सामग्री पक्षे इदं शेषवदित्युच्यते सामान्यतो
दृष्टं यथा अविभवेति प्रथमं प्रियायः समेतः कारणं करोति ॥ सत्तापदस्य शिरस्वरि पूर्णो वक्षः पु
रस्तादविरमेव । सर्वोविष्णुरिव वर्षिं कामेदत्ताति प्रथमात उपलभ्यमाना अविनाभावेन मालत्यागमनं
गमयतीति सामग्री पक्षे सामान्यतो दृष्टमेतत् । यद्वाप्तवचनं तद्वृत्ते यमागमसंज्ञया । उत्तमं मध्यमं चाथ
जघन्यं चेति त्रिविधा । तत्रोत्तमं द्विधा विधिरूपं निषेधरूपं च तयोर्विधिरूपं यथा ॥ इमं दानं यो हि दे-
ता न पितुर्वदतस्तो दद इति वाक्ये वीदयधं दत्तदाम्पन । अत्र च तद्देव एवाग्रे वीणा गानु वदति । वागनु
वदति यत्तन पितुर्वदह इति दयधं दत्तदाम्पनेति तद्देतत्रयं शिष्ये तदेमं दानं दयामिति श्रूते स्त देत द्विधि
रूपमाप्तवचनं । निषेधरूपं यथा । निवार्यता मालिनि मय्यपं दुपुनार्विवक्षुः स्फुरितोत्तराधरः न केवलं

32A

यो महतो पभाषणे शृणोति तस्मादपि यः स पापभाक्। अत्रोत्तरार्द्धोक्तो निषेधो ऽनुवादस्वरूप इति श्रु
तातेः वयवस्यापायोपमथवद् मानवद्दु निवारणोपदेशः स्वमहतोऽन्यपभाषापितव्या इति वा
क्यार्थतत्पर्यादयं निषेधरूप आगमः। तदितद्दुभः पमप्पवस्थानुष्ठेयत्वाद्दुत्तमे। मध्यमे द्विधा
निर्दिष्टवक्तृको ऽनिर्दिष्टवक्तृकश्च तयोराद्यो यथा। कल्पस्थावतगाप्येयं लोको प्रतिभाति मे। एति जी
वन्तमानन्दो नरं वर्षशतादपि॥ अत्र जीवन्नरः पश्यति भद्राणीति अथ पमे वाक्यार्थे निर्दिष्टवक्तृकः तदे
तत्सर्ववाक्यानां विधिनिषेधयोः पर्यवसानात् मारीचेन यां पतितव्यामिति विधिरूपमाश्वासने द्वितीयं
यथा अत्रैव सति पिशाचः पिचुमन्दे दिनपतिविटपस्तः॥ विश्राम्यति यद्गे श्रीस्तिष्ठति गोरीमधूक
तरो। तदिदमनिर्दिष्टवक्तृकमनादिलोकप्रसिद्धपरंपरागतमैतिह्यं। अत्रापि सर्ववाक्यानां विधि
निषेधयोः पर्यवसानात् तस्मादस्नेन सेवेत पिचुमन्दं न निकेतितवटेन छिद्यात्मपेन मूढ्। विमपानमधु
केन पादा स्पृष्टेन॥ इत्यध्याहारो भवति। सोऽयं निषेधरूप आगमः उभयमप्येतन्नावश्यानुष्ठेयमिति म
ध्यमं॥ जघन्यं द्विधा काम्यं निषिद्धं च तयोः काम्यं यथा गुडङ्ग आचुम्बकसा असाहि [illegible] पारावाव
रविस्तु [illegible]। तेल्लयन्ति अन्तगीरा विकु [illegible] पिशुरा एयशाए। तदेतत्पूर्वविद्धिधिरूपं काम्यमात्मवच
ने। निषिद्धं यथा। वयं वाल्मे [illegible] तः। सोमनि पूनः पश्चि [illegible] गताद यो छामोरद्वास्यारिण यविधानं
स्यानिरियं। तथारब्धं जन्म [illegible] यितु [illegible] केन विहितं नवि [illegible] मो गोत्रे पुंसे क्वचिदपि सती लोछनमसूताद

33

देतन्निषेधनूपेनिषिद्धमेवानवचनं। उभयेमपि चैतन्नामे [illegible] रिभिः संसृष्टेन न्यायादिदेवानन्तानुद्यं
यमितिजघन्य॥ सदृशात्सदृशज्ञानमुपमानेऽद्विधे हतत् [illegible] मनुभूतेऽनुभूते द्वितीयके
तयोरनुभूतार्थविषये यथा॥ सर्वमारामप्रवरामयवत्सुत माहन्यवक्ष [illegible] यथादि घरितवहतू
वेचमुच्चैडरोचिः। एवं वेगान्कुलिशमकरो [illegible] मविकन्सरहस्ते मतु बेक्रा [illegible] लनकपिशस्तेचरोषादद्दा
सं॥ अत्ररामकराकृष्टमाराम ग्रभूजे दिधनुर्धियुक्ते ज्योतिः [illegible] टासहस्रं कुलमाकाशेपयय
तोरावणादिनस्येपस्तयेद्धेषप्रभुवत्तः स्पलवदीर्णावज्रशकलविस्फूर्जथुधुतद्राघाट्टहासैवुधीवि
विपघापिः श्रुतस्मादृश्यबुद्धिः तद्विदमनपूर्वविषयं नामोपमानं मीमांसकावर्णयंति। अननुभूत
विषये यथा। तारो हिरणीं विज्ञानो हि ज्योतिषामंत्र मेठलोमसमूहस्तारकाणां यः शकटाकारमाश्रि
तः अत्रयथाविधः शकटाकारः तथाविधो रोहिणीतारकासमूहाकार इत्येवमवधारितास्मोपदेश
स्तदाकारतारकवक्त्रदर्शनादिदं तद्रोहिणी सकटमिती ये पसंज्ञासंज्ञिसंबंधप्रतिपत्तिस्तद्वि
दमननुभूतविषयमुपमानं नैयायिकास्समुन्नयंति। तथाभूतार्थविज्ञानजनकत्वेन हेतुना। नास्मा
दभिनयालेख्यमुद्राविवादयः पृथक् [illegible] तिष्ठभिनयो यथा चंद्रविवरणीगात्राट्टलोएरं [illegible] सा [illegible] ३३
च्चतहरणायाप त्वधरे हति अवहूए दहमे नात्सरणीवसमग्रशा अत्रपयोधरातियरिणाहसूचकी
तान प्रसारितांगुलिहस्ताभिनयसेनिभेरउद्दलसंनिवेशादर्शनात्स्वपमद्दष्टेपि हेलिकवधूस्त

33A

नपरिणाहे पूर्वानुभूतैवंविधस्तनपरिणाहसंवेद्यप्रतियातिस्तदिदमनुभूतार्थविषयमुपमान
मेवाभिनयरत्नमिस्यनोआलेख्ये यथा । तवालेख्ये कौतूहलतरलतन्वीविरचिते विधाये काचक्रस्व
पतिस्पति सुपर्णसुतमधः । अथास्य प्रत्यागतत्वरितमप्यम्भ्यैतदपराकरे योध्यं चापं मकरमुपरिष्टा
च्चलिखति । अत्र यद्यप्यनुभूतनायकसंदर्शनाया स्वरूपालेख्यप्रदर्शनादेवंभूतः स इति विज्ञानमुत्पद्य
ते गोपनार्थं चानुभावभूतयोरेव दृष्टवकुलादिविषयविस्मृकामयोः प्रतीतिर्भवति तदस्यानुभूतार्थविषयं भ
वति यद्यपुनरननुभूतनायकादिसंदर्शनाया इत्यमासो यदेशः एवंभूतः सुपर्णकेतुश्चक्रपाणिर्विष्णु
र्भवति । एवंभूतो मकरध्वजः पुष्पचापः कामो भवति । यादृशाविमौ तादृशश्च सतेमनोरथभूमिः केव
लमस्य गरुत्मदादयो नावियंते तदा तदुत्तरकालमालेख्यागततदाकारकदर्शनात्सोयं मम प्रियामिति
महिषपाकपालिलिखितो भविष्यतीति तदौपम्येनेव सुचिरात्स्यामिति गरुत्मच्चक्रेशः प्रदेश हस्त
योः केतुहस्तयोर्निवेशयति । अथापराम्प्रति विधिं सुर्णैपापतीप्रकाशयंतीवप्रत्यासन्नोपमानेम
न्मथाकारमालिख्यासुः करे योध्यं चापमकरमुपरिष्टाल्लिखति । अत्रानुलोपरत्वेपाइमास्तयोर्लो
कानो सोपयमिति विस्मृरितिकामइतिचसेतां संज्ञि संबंधप्रतिपत्तपास्त दिदमननुभूतार्थविषयमुप
मानमालेख्यमाख्यायते । मुद्रयथा । सचकितमिवविस्मयाकुलाभि … किसिकता स्वनिमानुषाणिता
भिः । क्षितिषु ददर्शिरेपदानिजिष्णोरयहितकेतुपागला … नाभि … अत्रचक्रध्वजांकितजिष्णुपादद्ध

द्गदर्शनात्सेयमामानुषीपादमुद्रभवतीतिसंज्ञासंज्ञिसंबंधप्रमितिस्तदिदमननुभूतार्थविषयमुपमा
नमेवमुद्रुष्यतो यदपिचादर्शेपिञ्जिसुपंदमृगीदृशामदर्शनः इत्यनुमानन्यायेनतदप्युपमानार्थेति
वेधनमेव।यदाह अपिचास्त्यनुमानेपिसादृश्यलिंगलिंगिनोः पदेन यत्रकुत्रेनकुञ्जः पादोनुमीयते
॥प्रतिबिंबं यथादर्शे रोचयपरीभोगदर्शिनो एवतः प्रत्यापनोनिषेदुषः। वीक्ष्यबिंबं मनुबिंबमात्मनःका
निकान्यपिचकारलज्जया। अत्रयदातावदेवंसंबंधग्रहः कीदृशं स्वंमुखंयादृशमादर्शेप्रतिबिंबत
दालोकनादर्शेपिस्वमुखेयपमीदृशमेमुखमितिप्रतिपत्तिस्तदिदमननुभूतार्थविषयंयदापुनरीप्स्यमा
न्नोयदृशाधादर्शवस्तुतादृशमीदर्शादौ प्रतिबिंबेनदापिप्रियतिबिंबालोकनादिदं नममप्रियप्रतिबिंब
मितीयंसंज्ञासंज्ञिसंसंबंधप्रतिपत्तिस्तदप्यननुभूतार्थविषयंयदा।नुन्यथादिषुनुभूतस्वमुखदर्शना
याः प्रतिबिंबदर्शनादनेनसदृशंमेमुखमितिप्रतिपत्तिर्दृष्टिप्रियतमाकारायाश्चप्रतिबिंबाकारदर्शना
देतदाकारोममप्रेयानितिप्रतिपत्तिः प्रतिबिंबसन्निधौप्रतिबिंबोदयोदृष्टस्तदिदमेनिहिते नतेन भावित
व्यमितियोग्रोज्ञविकारभूतस्तमउभूतविषयमेवतदुपमानंप्रतिबिंबमित्याचक्षते।प्रत्यक्षादिप्रतीतौयोग्य
त्वपानोपपद्यते। अर्थात्तिरस्त्वागमयस्यपित्तिवदेतितो। सर्वप्रमाणपूर्वत्वादेकशास्त्रमा।प्रत्यक्षपूर्वकि
त्वादिभेदैः योगानिगद्यते।तासुप्रत्यक्षपूर्वकायकथायथा।निर्गतुशक्यामस्तीतिमध्येतवनितंबिनि। ३४
अन्यथानुपपत्त्यैवयोधरभरस्थितेः।अत्रस्तनभरनितंबयोर्मध्यंनोपलभ्यते स्तनभरावस्थानिंचदृश्यते

34A

तत्रेयं पयोधरस्थितिः। सान्यथानुपपद्यमाना धारकं मध्यमनुपलभ्यमानं बोधयतीति सेयं प्रत्य-
क्षपूर्विकार्थापत्तिरेकेषामेव हृदि विलसिता। इयमपि पूर्ववद्बहुशो भावयितव्या। तत्रार्थापत्तिलब्धं मध्यं
तदपि धारणशक्तिमत्तरेणानुपपन्नमिति। तस्यापि शक्तिः कल्प्यते सेयमर्थापत्तिपूर्वि-
कार्थापत्तिः। यश्चार्थापत्तिविकल्पस्य मध्यस्योपलम्भाभावः सोपि न्यक्कारान्तरेण संभवति।
कार्श्ययोरुत्कर्षभूतेत्साचेयमभावपूर्विकानुपपत्तिर्भवति। न चैतदिह शास्त्रमपि तु वाक्यार्थसा-
मर्थ्यादुह्यते। प्रत्यक्षादिपूर्विकानेकशोपगा। एतत्पूर्वोक्तकल्पालाद्वि। रूपदर्शिमंतवकल्प्यामः का-
लातत्वागुरुतामादिर्विधसः। तत्रेदंरूपप्रतिमं नवेति प्रत्यक्षपूर्वतानुमानपूर्वं। नाच व्याप्तमेव प्रती-
पतेतेनेयमनेकशः अत्रापि पंचपस्याप्रतिमता न्यथानुपपद्यमाना कलतत्त्वगुरुत्वविनिर्मितत्त्वम-
त्मनोवगत्यापपत्तिसार्वभौमता। न्यादिसूयोयमानत्तानपूर्वोकापातत्कतुरर्थापत्तिकल्पिताकला-
तत्त्वगुरुतासापिनयाविधशक्तिकल्पनापूर्विकेति॥ उपमापूर्विकार्थापत्तिपूर्विकाचेयमर्थापत्तिः॥
सापितत्कतुर्वधमः कतत्त्वगुरुतातथाभूतशक्त्याधारतावासाप्यनुमामत आगमतो वा हातस्यक-
ल्पातरत्यनुमानपूर्विकावेयमर्थापत्तिः नचैतत्सुत्वयमिहापिशास्त्रमपितुवाक्यार्थसामर्थ्यादुह्यते
। एकवाक्यानुमानपूर्विकायथा। कपोलकेनास्याः सूचितो मदनज्वरः। मनोजनिरंतरासक्तोसरव्यः कपयाति
प्रिये। अत्र योयं कपोलकेनानुमानो मनोभवज्वरः समनकः प्रिसेनिर्वर्तारशक्तिमंतरेणानुपपन्न इत्यव

मानपूर्विके यथार्थापत्तिः। अनेकश उपमादिपूर्विका यथा। यावत्सेंदुसमोदञ्चानदिदंक
ल्पया महो। अन्योन्यगामिलावण्यमनयोरेव केवलं। अत्रान्यासिंदुसमोदसन्नुपमानपूर्विका
अर्थापत्तिः प्रत्यक्षपूर्विका लावण्यगृहीत एव प्रतीयते। यावन्मिथः सादृश्यानुपपत्त्या लावण्यान्योन्य
गामिता स्थापिता पाविंध्यं विधाता रमं तरेणैव संगच्छत इत्या दोहापि पूर्ववद्वाक्यार्थसामर्थ्यतोव
गंतव्यं। एकशोऽभावपूर्विका यथा। एतद्दासां विनाहासं निवेदयति सुभ्रुवः। प्रियापराधदेऽनानाम
नोभाजनोगतौ। अत्रायुध इत्यनेनविलासवत्याः समस्तप्रशस्तलक्षणायोगो लक्ष्यते। तथा स्त्रिया
यांश्च वक्रोपि विलासहासस्याभावो नुपपद्यमानः शोकव्यतिरिक्तमात्मकारणं कल्पयतीति अभा
वपूर्विके यमर्थापत्तिः। अनेकशोऽर्थापत्त्यादिपूर्विका यथा। इह क्षपाविभ्रमिरणीमेतां विपन्नलोत्ला गृहं स्मरं।
स्मरं नः २ सद्गर्णी वाप्याम तु सख्याः कृतां स्मरं। अत्र विभ्रमिरिणीतिप्रशंसायामत्वर्थीयेनविभ्र
माणामुत्कर्षो लक्ष्यते तेषामाप्तोपदेशात्संभवंतो मन्मथमुपाध्याये बोधयंति तान्याप्तनः पार्श्वतो वानुप
लभ्यमानस्य तन्मनस्तुव स्यानेन लक्ष्यते सेयमाद्यप्रत्यक्षपूर्विका द्वितीया वार्थापत्तिपूर्विकार्थापत्तिर्भवति
। अयमेव च मन्मथोपूर्व नासिका मिनीनां संभवतीति आप्तोपदेशाद्वागमपूर्विकापि भवति। असत्ताया पद्म
र्थो नाम भावः सोभिधीयते। प्रागगात्स्वर्गपरिजाते कौस्तुभलक्ष्मीविरहिते मधुमथनस्योरः स्मरामि मथन
पुरतो मुग्धचंद्रेण च हराननस्य। भारं भावादि भेदेन सप्तद्विधरूपं तेनानेषु प्रागभावो यथा। संगोऽ अपारि

35A

पारिजा ओ कोत्थुहलच्छिविरहिअं महुमहस्स उरं । सुमरामि महणपुरओ अमुद्धअंदं च ह
रजडापब्भारं । प्रध्वंसाभावो यथा धृतिरस्तमिता गतिश्च्युता विगतं गेयमृतुर्निरुत्सवः ॥ गमाभारणप्रयो
जनं परिशून्यं शयनीयमद्य मे इतरेतराभावो यथा । करौ तयले न च वक्त्रमेतेन च तुच्छवलोपन्यले । इति ज्ञा
नत्रपि जनो मन्यते नेत्रदीर्घतां अत्यंताभावो यथा मंजुसरोरुहसारं तं सौदिइत्ति किंत्यच्छेदं । [illegible]
नेपिरुद्दिसवेत इदोहगोसवतीरां । अन्ये पुनरन्यथा अत्यंताभावमात्र इति यथा मसीहृ [illegible] मुंचे ।
मेचंद्रिमानं मनोगतं दृष्टमात्रे पि पिते तत्र शेषः खकुसुमायते ॥ सामर्थ्याभावो यथा । मानुषी पुरुषे वा स्यां
इत्यनूपस्यासंभवः । मधुमातरलंज्योतिरह दैतिच सुधातलो न एष इ पिनिगदैरेव व्याख्यातः अभावाभावो
प्यभावएवात न प्रागभावः प्रध्वंसो यथा उद्यानसहकाराणाम मुद्भिन्ना नमंजरी दृश्यः पथिकनारीणां सति
लः सलिलांजलिः प्रध्वंसप्रागभावो यथा । नामन्यालिकस्त्रिदिवाग्रहीयते मि येन नाग्रयादिबलभोजनः
प्रध्वंसप्रध्वंसो यथा । निवृत्तमेव त्रिदिवप्रयोजनं मतः सचेज्जीवन एव जीवति । प्रध्वंसप्रागभावप्रध्वंसो
यथा । नागलितमस्ति किंचिन्नीचोदेशस्य सर्वथा नापाप्रसरन्तुकारस्य वापं प्रकृतिरुषामध्ये शेषि । प्रध्वंस
प्रध्वंसस्य प्रध्वंसो यथा । एषा प्रवासं कथमप्यनीत्य यातानेः सशाप मस्य घैव ॥ को नाम याकाभिमुखस्य जेतोर्दू
रणिरैवस्यपिधातुमिच्छे । इतरेतराभावाभावो यथा । श्वासने पि गुरु [illegible] निनियुंक्ष्व का
मतः त्वम्य योजन धनंध नेजयादन्यएव इति मोच मावगाः ॥ [illegible] भाव सच प्रध्वंसाभा

बोधया। अतामयुरोपाचपेर्दुर्वायाफलस्यानिर्हृतरजाः सा ... श्री ... मवर्शनसंपदे षाद्धेषद्दे वो
वीतवलाहकायाः। एतेनातिदुर्बोधा इति नव्याकृताः अर्थालंकृतयो ऽभिताश्चतुर्विंशतिसंख्यया। कथि
ताः काव्यविता नोचित्तप्रह्लाददहेतवे॥ इति श्रीभोजराजविरचिते सरस्वतीकंठाभरणे ऽलंकारशास्त्रे तृतीयः
परिच्छेदः॥३॥ श्रीकृष्णार्पणमस्तु॥ ॥श्री॥ शब्देभ्यो यत्रिवार्थेभ्य उपमादिः प्रतीयते। विशिष्टो यः क
वीनां ता उभयालंक्रियाः प्रियाः॥ उपमारूपकं साम्ये संशयोक्तिरपह्नुतिः॥ समाध्युक्तिः समासोक्तिरुत्प्रे
क्षाप्रस्तुतस्तुतिः। तुल्ययोगिता लेशः सहोक्तिः समुच्चयः॥ साक्षेपोऽर्थान्तरन्यासः सविशेषा परिष्कृतिः
